# Vashishthaprokta Shiva Dhyana Mantra Puja

# વશિષ્ઠપ્રોક્તા શિવધ્યાનમન્ત્રપૂજા

## Document Information

Text title : Vashishthaprokta Shiva Dhyana Mantra Puja

File name : shivadhyAnamantrapUjAvashiShThaproktA.itx

Category : shiva, dhyAnam, mantra, pUjA

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : Kalikapurana Adhyaya 51 shloka 116-158

Latest update : January 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2022

*sanskritdocuments.org*

# વશિષ્ઠપ્રોક્તા શિવધ્યાનમન્ત્રપૂજા

વેતાલભૈરવાવૂચતુઃ -
યેન મન્ત્રેણ નચિરાત્ સમ્યગારાધિતો હરઃ ।
પ્રસાદમેષ્યત્યવનૌ તન્નો વદ મહામુને ॥ ૧૧૬॥

યથા ચારાધયિષ્યાવસ્તન્ત્રં યદ્યાદૃશઃ ક્રમઃ ।
તત્સર્વં મુનિશાર્દૂલ વક્તુમર્હસિ ચોત્તરમ્ ॥ ૧૧૭॥

યથા ત્વદુપદેશેન પ્રાપ્સ્યાવો નચિરાદ્ હરમ્ ।
યથા વાચાં મુનિશ્રેષ્ઠ હ્યનુશાધિ ન તૌ ત્વયિ ॥ ૧૧૮॥

વસિષ્ઠ ઉવાચ -
પ્રસન્ન એવ ભવતોર્વૃષકેતુઃ સહોમયા ।
નચિરાત્ સ્વયમેવાત્ર પ્રસાદં ચ સમેષ્યતિ ॥ ૧૧૯॥

સર્વૈર્દેવગણૈઃ સાર્ધં સભાર્યો વૃષભધ્વજઃ ।
આકાશમાર્ગેણાયાતઃ પાલયન્ સ્વસુતૌ ગૃહાત્ ॥ ૧૨૦॥

કિન્તુ માનુષદેહૌ વામધિવાસ્ય તપોવ્રતૈઃ ।
સ્વયન્નેષ્યતિ કૈલાસં ગાણપત્યે નિયોજ્ય વામ્ ॥ ૧૨૧॥

અહં ચાપ્યુપદેક્ષ્યામિ યથા ભર્ગં યુવાં દ્રુતમ્ ।
પ્રાપ્સ્યથઃ પાર્વતીપુત્રાવેકાગ્રં શ઼ૃણુતં તુ તત્ ॥ ૧૨૨॥

ચિરાત્ પ્રસીદતિ ધ્યાનાન્નચિરાદ્ધ્યાનપૂજનાત્ ।
તસ્માદ્ધ્યાનં પૂજનં ચ કથયામ્યદ્ય તત્ત્વતઃ ॥ ૧૨૩॥

તેજોમયઃ સદા શુદ્ધો જ્ઞાનામૃતવિવર્ધિતઃ ।
જગન્મયશ્ચિદાનન્દઃ શૌરિબ્રહ્મસ્વરૂપધૃક્ ॥ ૧૨૪॥

મહાદેવો મહામૂર્તિર્મહાયોગયુતઃ સદા ।
જગન્તિ તસ્ય રૂપાણિ તાનિ કો ગદિતું ક્ષમઃ ॥ ૧૨૫॥

કિન્તુ યૈરિહ રૂપૈસ્તુ વિચરત્યેષ શઙ્કરઃ ।
તેષાં યન્મે જ્ઞાનગમ્યં તત્રેષ્ટં નિગદામિ વામ્ ॥ ૧૨૬॥

પ્રથમં શ ृણુતં મન્ત્રં તતોઽનુધ્યાનગોચરમ્ ।
તતઃ ક્રમં તુ પૂજાયાઃ ક્રમાદ્વૃત્તં નરર્ષભૌ ॥ ૧૨૭॥

સમસ્તાનાં સ્વરાણાં તુ દીર્ઘાઃ શેષાઃ સબિન્દુકાઃ ।
ઋલ્રશૂન્યાઃ સાર્ધચન્દ્રા ઉપાન્તેનાભિસંહિતાઃ ॥ ૧૨૮॥

એભિઃ પઞ્ચાક્ષરૈર્મન્ત્રં પઞ્ચવક્ત્રસ્ય કીર્તિતમ્ ।
ક્રમાત્ સમ્મદસન્દોહ-નાદગૌરવ-સંજ્ઞકાઃ ॥ ૧૨૯॥

પ્રાસાદસ્તુ ભવેચ્છેષઃ પઞ્ચમન્ત્રાઃ પ્રકીર્તિતાઃ ।
એકૈકેન તથૈકૈકં વક્ત્રં દેવં પ્રપૂજયેત્ ॥ ૧૩૦॥

એકં સમુદિતં કૃત્વા પઞ્ચભિર્વા પ્રપૂજયેત્ ।
પ્રસાદેનાથ વા પઞ્ચવક્ત્રં દેવં પ્રપૂજયેત્ ॥ ૧૩૧॥

સમ્મદાદિષુ મન્ત્રેષુ પ્રાસાદસ્તુ પ્રશસ્યતે ।
શમ્ભોઃ પ્રસાદનેનૈષ યસ્માદ્વૃત્તસ્તુ મન્ત્રકઃ ॥ ૧૩૨॥

તેન પ્રાસાદસંજ્ઞોઽયં કથ્યતે મુનિસત્તમૈઃ ।
તસ્માત્ સર્વેષુ મન્ત્રેષુ પ્રાસાદઃ પ્રીતિદઃ પરઃ ॥ ૧૩૩॥

આમોદકારકઃ શમ્ભોર્મન્ત્રઃ સમ્મદ ઉચ્યતે ।
મનઃપ્રપૂરણાચ્ચાપિ સન્દોહઃ પરિકીર્તિતઃ ॥ ૧૩૪॥

આકર્ષકો ભવેન્નાદો ગુરુત્વાદ્ગૌરવાહ્વયઃ ।
એતદ્વ્યસ્તં સમસ્તં ચ મન્ત્રં શમ્ભોઃ પ્રકીર્તિતમ્ ॥ ૧૩૫॥

પઞ્ચાક્ષરં તુ યન્મન્ત્રં પઞ્ચવક્ત્રસ્ય કીર્તિતમ્ ।
યુવાં તેનૈવ મન્ત્રેણ આરાધયતમીશ્વરમ્ ॥ ૧૩૬॥

ધ્યાનં વક્ષ્યામિ શ ृણુતં સમ્યગ્વેતાલભૈરવૌ ।
પઞ્ચવક્ત્રં મહાકાયં જટાજૂટવિભૂષિતમ્ ॥ ૧૩૭॥

ચારુચન્દ્રકલાયુક્તં મૂર્ધ્નિ બાલૌઘભૂષિતમ્ ।
બાહુભિર્દશભિર્યુક્તં વ્યાઘ્રચર્મામ્બરામ્બરમ્ ॥ ૧૩૮॥

કાલકૂટધરં કણ્ઠે નાગહારોપશોભિતમ્ ।
કિરીટબન્ધનં બાહુભૂષણં ચ ભુજઙ્ગમાન્ ॥ ૧૩૯॥

બિભ્રતં સર્વગાત્રેષુ જ્યોત્સ્નાર્પિતસુરોચિષમ્ ।
ભૂતિસંલિપ્તસર્વાઙ્ગમેકૈકત્ર ત્રિભિસ્ત્રિભિઃ ॥ ૧૪૦॥

નેત્રૈસ્તુ પઞ્ચદશભિર્જ્યોતિષ્મદ્ભિર્વિરાજિતમ્ ।
વૃષભોપરિ સંસ્થં તુ ગજકૃત્તિપરિચ્છદમ્ ॥ ૧૪૧॥

સદ્યોજાતં વામદેવમઘોરં ચ તતઃ પરમ્ ।
તત્પુરુષં તથેશાનં પઞ્ચવક્ત્રં પ્રકીર્તિતમ્ ॥ ૧૪૨॥

સદ્યોજાતં ભવેચ્છુક્લં શુદ્ધસ્ફટિકસન્નિભમ્ ।
પીતવર્ણં તથા સૌમ્યં વામદેવં મનોહરમ્ ॥ ૧૪૩॥

નીલવર્ણમઘોરં તુ દંષ્ટ્રા ભીતિવિવર્ધનમ્ ।
રક્તં તત્પુરુષં દેવં દિવ્યમૂર્તિં મનોહરમ્ ॥ ૧૪૪॥

શ્યામલં ચ તથેશાનં સર્વદૈવ શિવાત્મકમ્ ।
ચિન્તયેત્ પશ્ચિમે ત્વાદ્યં દ્વિતીયં તુ તથોત્તરે ॥ ૧૪૫॥

અઘોરં દક્ષિણે દેવં પૂર્વે તત્પુરુષં તથા ।
ઈશાનં મધ્યતો જ્ઞેયં ચિન્તયેદ્ભક્તિતત્પરઃ ॥ ૧૪૬॥

શક્તિત્રિશૂલખટ્વાઙ્ગવરદાભયદં શિવમ્ ।
દક્ષિણેષ્વથ હસ્તેષુ વામેષ્વપિ તતઃ શુભમ્ ॥ ૧૪૭॥

અક્ષસૂત્રં બીજપૂરં ભુજગં ડમરૂત્પલમ્ ।
અષ્ટૈશ્વર્યસમાયુક્તં ધ્યાયેત્તુ હૃદ્ગતં શિવમ્ ॥ ૧૪૮॥

એવં વિચિન્તયેદ્ધ્યાને મહાદેવં જગત્પતિમ્ ।
ચિન્તયિત્વા દ્વારપાલાન્ ગણેશાદીન્ પ્રપૂજયેત્ ॥ ૧૪૯॥

વિશુદ્ધિં પઞ્ચભૂતાનાં ચિન્તયિત્વા તતો મુહુઃ ।
અષ્ટમૂર્તીસ્તતઃ પશ્ચાત્ પૂજયેદષ્ટનામભિઃ ॥ ૧૫૦॥

આસનાનિ ચ તસ્યાથ પૂજયેત્ સકલાનિ તુ ।
ભાવાદીન્યષ્ટપુષ્પાણિ હૃદૈવ વિનિયોજયેત્ ॥ ૧૫૧॥

નારાચમુદ્રયા તસ્ય તાડનં પરિકીર્તિતમ્ ।
વિસર્જનં ધેનુમુદ્રાં દર્શયિત્વા વિધાનતઃ ॥ ૧૫૨॥

નિર્માલ્યધારણં કુર્યાત્ સદા ચણ્ડેશ્વરં ધિયા ।

પ્રત્યેકં પઞ્ચભિર્મન્ત્રૈરઙ્ગાદીનિ પ્રમાર્જયેત્ ॥ ૧૫૩॥

સમ્મદાદિભિરેતસ્ય પૂર્વોક્તૈર્નરસત્તમૌ ।
બાલાં જ્યેષ્ઠાં તથા રૌદ્રીં કાલીં ચ તદનન્તરમ્ ॥ ૧૫૪॥

કલવિકરિણીં દેવીં બલપ્રમથિનીં તથા ।
દમનીં સર્વભૂતાનાં મનોન્મથિનીં તથૈવ ચ ॥ ૧૫૫॥

અષ્ટૌ તાઃ પૂજયેદ્દેવીઃ ક્રમાચ્છમ્ભોશ્ચ પ્રીતયે ।
એવં શિવં પૂજયિત્વા ધ્યાનતત્પરમાનસઃ ॥ ૧૫૬॥

જપેન્માલાં સમાદાય મન્ત્રં ધ્યાત્વા તથા ગુરુમ્ ।
એકં પઞ્ચાક્ષરં મન્ત્રમેકં પ્રાસાદમેવ વા ॥ ૧૫૭॥

તત્સક્તમનસૌ જપ્ત્વા શીઘ્રં સિદ્ધિમવાપ્સ્યથઃ ।

ઇતિ કાલિકાપુરાણે એકપઞ્ચાશત્તમાધ્યાયાન્તર્ગતા
વસિષ્ઠપ્રોક્તા શિવધ્યાનમન્ત્રપૂજા સમાપ્તા ।

Proofread by PSA Easwaran

*Vashishthaprokta Shiva Dhyana Mantra Puja*
pdf was typeset on January 15, 2022

Please send corrections to *sanskrit@cheerful.com*